भूतदुरदृष्टादिकमालोच्य । **निजमनोभीष्टं** स्वभक्तमनोभीष्टं ज्ञानभक्तिसुखसंपदादि । **दिशामि** ददामि । दिश अतिसर्जन इतिधातोर्लट् । **इति** इममर्थम् । **सम्यग् ज्ञापयितुं** करपल्लवमुद्रया प्रत्यक्षतोऽपि दर्शयितुम् । **करेण** दक्षिणहस्तेन । **विलसन्मंथानं** स्फुरन्मथनदंडम् **अन्येन** वामेन करेण । **रम्यं** मनोहरम् । **दाम** दंडवेष्टनरज्जुम् । **दधत्** दधानः । नाभ्यस्ताच्छतु[1]रिति-नुमभावः । **महेश्वरजतग्रामश्रियः** *शिव(व)ल्याख्यग्रामश्रियः । **अलंकृतिः** अलंकारभूतः । ननु शिवदेवस्तदलंकारोऽस्तु किमनेनेत्यत्रापीदमेवोत्तरम् । महेशस्य रजतग्रामवत् रजतसमूहवत् या श्रीः अंगकांतिः तस्याः अलंकारभूतः । मौक्तिकांतरितेंद्रनीलरत्नवदंतर्यामितया तमपि भासयन्नित्यर्थः । ननु रुद्रस्यांतर्यामित्वं कृष्णस्य कुत इत्यत्रापीदमेवोत्तरम् । महेशस्य यो रजतग्रामः कैलासः तत्र या श्रीः तस्याः अलंकृतिः प्रलये निराकरणं यस्मात्स तथोक्तः । प्रलये शिवस्यापि संहर्तृतया शिवादप्युत्तमत्वाद्धरिरेव तदंतर्यामीति भावः । **कर्मंदीश्वरभक्तिबंधनवशः** कर्मंदिनां संन्यासिनां ईश्वराः श्रेष्ठाः यतीश्वराः इत्यर्थः । 'भिक्षुः परिव्राट् कर्मंदी' इत्यमरः । तेषां भक्तिबंधनवशः भक्त्यधीनः । **प्रभुः** कृष्णः । **प्रीतः** संतुष्टः । **अस्तु** । **उत्प्रेक्षालंकारः** **वृत्तं तु शार्दूलविक्रीडितम्** । 'सूर्याश्वैर्मसजस्तताःसगुरवश्शार्दूलविक्रीडितं' इति । ॥ ११ ॥

चांचल्यं पृष्ठदेशे कठिनकृतिरधोवक्रता क्वापि कोपो
याञ्चा कस्मादकस्मादपकृतिरुपकारिष्वपि प्राज्ञमौले ।
स्त्र्यर्थेऽन्यस्त्रीष्ववज्ञा किमिति रमण ते चोरता मायिकत्वं
चित्रं रोहावरोहाविति विरसगिराऽप्यादृतः पातु कृष्णः ॥१२॥

---

* शिवळ्ळीति अपभ्रष्टभाषायाम् ।

—इति सुमध्वविजयभावप्रकाशिकायाम् (II. 10)

---

[1] पा. सू. 7/1/78